- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 6/12
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – ननु सन् घट इत्याद्य प्रत्यक्षबाधितविषयादृश्य-त्वादम इति चेन्न –
- End – रजतत्वैरजते ऽनुभूयमाने घटादौ रजतत्व ।
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन / प्रमाण सम्बन्धित
- Revisor -
- Author -

1. Remarks- अपूर्ण /

Rahul Kumar
राहुल कुमार

१ ननु सन् घट इत्यादिप्रत्यक्षस्य बाधितविषयत्वादप्रमाण्यमिति चेन्न चक्षु
रादेस्तद्योग्यतायामपि ध्यानाद्विरोधित्वात् [illegible] निरुक्तेः तथा हि न
ना वस्तुसमासविषयत्वं तद्योग्यत्वं समासविषयत्वं वा तादृशसत्वं
च वस्तुरूपागम्यस्य तत्समासाघटितत्वेन च वस्तुरूपयोग्यत्वात् वस्तु
मात्रग्रहणगणनेऽज्ञाताज्ञाते तथा हि नासतः प्रत्यक्षप्रमाण
प्रवृत्तेः तद्विषयत्वात् प्राकृतसत्त्वस्य वस्तुव्यत्वे न तस्य तदन्य
त्वात् सत्वानिरूपणं विना सदसद्विषयकत्वरूपप्रमाणत्व
स्यानिरूपणेन चान्योन्याश्रयात् ॥ निष्प्रामाण्यं तस्यापि ॥ राम

२

२

नसद्वैलक्षण्यं वा एतेषां मिथ्यात्वविरोधित्वेन तत्सत्त्वे तेषां मिथ्यात्वानुमाने बा
धाभावात् नापि वेदान्ताभिमतमिथ्यात्वाभावः सत्त्वं तुच्छेऽतिव्याप्तेः नाप्यव
च्छिन्नलक्षणत्वे सत्त्वं नारोपितत्वं अनारोपितत्वं स्यारोपाविषयत्वं तच्चासं
भवित ब्रह्मण्यपि वेदान्तिकाभ्यां दिना आरोपविषयत्वात् नाप्यबाधितत्वप्रकार
कप्रमांप्रतिकदाचिदविषयत्वं कालसंबंधित्वे वासत्त्वमसत्त्वं च वर्त
मानत्वं नतु सत्त्वमतो नात्माश्रयः अतीतादिरपि कदाचिद्वर्तत एवेति ना
व्याप्तिः आरोपितं च कालत्रयासंबंधित्वेन बाधेन बोधितमिति न श्रुति
लक्षणेऽतिव्याप्तिरिति वाच्यं प्रमात्वस्य सत्त्वघटितत्वेन चक्रकापत्तेश्च
च पूर्वोक्तदोषात् वर्तमानत्वप्रकारकप्रमाविषयत्वेऽपि मिथ्यात्वाविरो
धात् ब्रह्मणि श्रुतिप्रमापि न मिथ्यात्वविरोधिः श्रुतिरूपस्यापि प्रतिभासकालसंबं
धित्वात् बाधेन तात्त्विककालत्रयासंबंधनिषेधेऽप्यतात्त्विककालसंबंधस्या
निषेधात् नापि तात्त्विककालसं —

3

२

त्तिरजतसंसर्गस्य व्यवसायद्वारा साक्षाद्बाधनिषेध्यत्वादिना प्रमा
विषयत्वाभ्युपगमाच्च नापि द्वितीयः सोऽप्यततादात्म्यानिरूपणा
त् न तृतीयः असिद्धेः सर्वस्यैव बाधितत्वादिना प्रमाविष
यत्वाभ्युपगमात् अत एव नासत्त्वप्रकारकप्रमाविषयत्व
मपि अन्योन्याश्रयाच्च नापि सत्त्वप्रकारकप्रमाविषयत्वं आ
त्माश्रयत्वात् नाप्यसत्त्वप्रकारकभ्रमविषयत्वं सत्त्वमन्यो
न्याश्रयात् नापि प्रतिपन्नोपाधौ त्रैकालिकसत्त्वनिषेधावि
रहः आत्माश्रयत्वात् नापि सत्ताजातिर्व्यक्तिपाकालीत्व

२

दत्तोवरस्यमाताभवान्नपतोजामातृश्वशुरयोरेकगोत्रत्वेविवाहापपत्ति
वज्जगद्रूसत्तयोरैकसत्वेजगतो ५ सत्वमेवस्यात्तस्याहिस्वप्रकाशाच्छिती
पचैतन्यस्वरूपत्वमेवब्रह्मणः सत्वंतदेवचेज्जडस्यापिजगतस्तदारज
तत्वाविरोधिच्छशृंगादिसत्तयापारजतस्यैवजडत्वादिरोपिस्वप्रकाशत्व
तयाजगतस्वरूपतोमिथ्यात्वोपपत्तेः चैतन्यस्यैवावाच्छिन्ना
नवच्छिन्नास्थानविच्छिपत्वेनसर्वभ्रमाधिष्ठानत्वाभ्युपग
मात् भ्रमाधिष्ठानत्वेनशुक्तयादेस्सत्वासिद्धेः नन्वेवमपि
सर्वदेशीयपत्रेकालिकनिषेधप्रतियोगित्वमसत्वंतुच्छा
निर्वचनीयपक्षाधारणंतदभाववत्त्वात्तत्स्वप्रकाशेवजगत्यपी

८ दम् येनतदभावः प्रत्यक्षो भवेत् वृत्तिमत्प्रतियोगिकत्वं व्याप्यवृत्तित्वपी
त्यागेपि सर्वदेशीयत्वत्रैकालिकत्वयोरुपपत्त्वात् ननु स्वदेशकालवृत्ति
निषेधप्रतियोगित्वाभावे गृह्यमाणे कालत्रयमध्यवर्त्तमानकालस्यैव
देशमध्ये प्रकृतदेशस्यापि प्रवेशेन तत्र निषेधप्रतियोगित्वाभावस्य गृ
हीतत्वात् तत्संवलितकालत्रवृत्ति सर्वदेशीयप्रतियोगित्वरूपं मिथ्यात्व
नानुमानेन ग्रहीतुं शक्यमिति चेन्न स्वदेशकालवृत्तिसकलनिषेधप्रति
योगित्वस्य चतुर्लक्षणोक्तत्वेन तदभावस्य ग्रहीतुं तदयोग्यत्वात् स्वदेशका
लवृत्तियत्किंचिन्निषेधाप्रतियोगित्वस्य मिथ्यात्वाविरोधित्वात् स्वप्र
तियोगिताकात्यन्ताभावासामानाधिकरण्यस्य च स्वप्रतियोगिताकात्यं
ताभावप्रतिक्षेपः केवलान्वयिनि संबंधभेदेन घटादौ चासिद्धेः स्वात्यंता । ताम

तिक्रमः न च संयोगे व्याप्तिः तस्याव्याप्यवृत्तित्वानभ्युपगमात् अभ्युप
गमे च व्याप्यवृत्तित्वेनाभावो विशेषणीयः नापि विषयत्वव्याप्तिः त
दत्यन्ताभावस्य केवलान्वयित्वानङ्गीकारेणालंदत्तस्याविद्यमान
त्वादेव नहि कस्मिंश्चिद्देशे काले वा तस्याभावः नित्यत्वाविभुत्व
भंगप्रसंगात् आकाशात्यन्ताभावस्य केवलान्वयित्वाभ्युपग
मे च वृत्तिमत्प्रतियोगिकत्वेनाभावो विशेषणीय इति चेन्न
चक्षुरादयोऽप्यनेकपदार्थप्रतियोगित्वेनैतादृशाभावस्याग्रह
णे चक्षुरादेरसामर्थ्यात् नहि सर्वदोषीयत्रैकालिकवृत्ति
नत्प्रतियोगिकव्याप्यवृत्तिनिबंधप्रतियोगित्वं कस्यापि प्रत्य

५

धारत्वं च वह्न्यादिर्योऽर्थवत्तत्तु सामान्येनेन्द्रियप्रत्यासत्तिः सामाभावात्तन
च महानसीयधूमे इन्द्रियसंयोगेन तस्यैव व्याप्तिग्रहे पर्वतीयधूमादनुमितिर्न
स्यात् सामान्यस्य च धूमत्वादेः प्रत्यासत्तित्वे तस्यापि प्रत्यासन्नत्वात् न
तद्व्याप्तिग्रहे ततोऽनुमितिरिति वाच्यम् पर्वतीयधूमेन्द्रियसन्निकर्षदशायां
धूमत्वेन प्रकारेण गृहीतम् तद्व्याप्ये ज्ञाने ज्ञेयोऽपि विषयत्वसंभवात् सामिचेद
नमितिवत् विशेष्येन्द्रियसन्निकर्षविशेषणज्ञानाद् ज्ञानग्रहरूपाभावविशि
ष्टज्ञानसामग्र्याः पूर्णत्वात् व्याप्तिसम्पत्तिप्रकारेण वा पक्षधर्मताज्ञानेन च (
हेतुता महानसीय एव धूमो धूमत्वेन व्याप्तिसम्पत्तिविषयो भवति धूमत्वे पर्व
तीयधूमस्य ज्ञानमपि जातं तच्च सामान्यलक्षणां विनैव तावतैवानुमितेः सिद्धेः
न च सामान्यप्रत्यासत्तिं विना धूमो वह्निव्यापिकान्नवेति संशयः मानसः सं (पि
शयो न स्यात् प्रसिद्धधूमे वह्निसंबंधावगमात् अप्रसिद्धस्याज्ञानादिति वा ५

भावयावदधिकरणवृत्तित्वं वा स्वात्यंताभावस्य किंचिदधिकरणावृत्तित्वम
त्येति विकल्पेन पूर्वोक्तदोषाद्य तस्मात्प्रकारांतरस्य निरूपयितुमशक्यत्वात्
तिष्ठ्यात्ताविरोधित्वाद्य स्वसमानाधिकरणयावदत्यंताभावप्रतियोगित्वा
भावरूपमेव सत्वमुपेयम् तत्र च नक्षत्रादिदोषमपि न युक्तम् नन्वथास्मिन्का
स्मिन्सदेशकालवृत्तिनिषेधे एतद्देशे तत्कालवृत्तिनिषेधत्वेनात्तेन
प्रसक्तसतिभूतलेनुपलब्धितानां सदेशकालवृत्तिसकलनिषेधानां प्रतियो
गित्वस्याभावोपपद्यता सहताःसार्वे दिक् सर्वदेशीयनिषेध प्रतियोगित्व महत्वं
यदत्रुघटमिति चेन्न एवं सामान्यतस्तादात्म्य सर्वनिषेध भूपाद्यस्थितेष्वपि त
त्प्रतियोगित्वाभावस्य वक्तुं एदिनागृहीतमशक्यत्वात् दोषप्रतियोगि
क एव हि संसर्गाभावोपः नत्वाशेषनिषेधानां प्रतियोगित्वमतीद्रिपसा